# आदर्शप्रश्नपत्रम् (2024-25)

**कक्षा-एकादशी** **कोड न. - 526**

रोलनं०

# संस्कृतम्

समयः -होरात्रयम्] [पूर्णाङ्काः -80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर नकाटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः:–**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन्प्रश्नपत्रेपञ्चखण्डाःसन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 17 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 31 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः - 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

इदं युगं विज्ञानप्रयाणमस्ति। अस्मिन् युगे विज्ञानस्य नूतनाः चमत्काराः दृश्यन्ते श्रूयन्ते च। सर्वत्र विज्ञानस्यैव वार्ता प्रसरति। सर्वत्रैव विज्ञानमेव दृष्टिगोचरतां समायाति। विज्ञानं पदे-पदे अस्माकं मित्रवत् सहायतां करोति। विज्ञानमाश्रित्य जनः अद्य आकाशे पक्षीवत् उत्पतति, भूमौ वायुवद् धावति, जले मत्स्य इव तरति। अतः जीवनस्य प्रत्येकक्षेत्रे विज्ञानस्य महद् योगदानम् अस्ति। शिक्षायां, व्यापारे, मनोविज्ञाने, चिकित्सायाम्, दूरदेशयात्रासु, वस्तुनिर्माणादिषु च सर्वेषु क्षेत्रेषु विज्ञानमेव परिदृश्यते। अतएव वर्तमानयुगं 'वैज्ञानिकयुगम्' इत्युच्यते।

अस्मिन् युगे विज्ञानं विना जीवनयापनं दुष्करम् अस्ति। मनुष्यः स्वकीयकार्याणि विज्ञानस्य सहायतया करोति । विद्युच्छक्तेः आविष्कारेण मानवसभ्यतायाः विकास अभवत्। कृषिक्षेत्रे, उद्योगक्षेत्रे, यन्त्रागारे च सर्वत्र विद्युच्छक्तिः एव नयनपथमायाति। कृषिक्षेत्रे सर्वं कार्यं विद्युच्चालितयन्त्रैः भवति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) इदं युगं कीदृशम् अस्ति ?
(ख) विज्ञानं विना किं दुष्करम् अस्ति ?
(ग) विद्युच्छक्तेः आविष्कारेण कस्याः विकासः अभवत् ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) अस्मिन् युगे विज्ञानस्य कीदृशाः चमत्काराः दृश्यन्ते श्रूयन्ते च ?
(ख) जीवनस्य प्रत्येकक्षेत्रे कस्य महद् योगदानम् अस्ति ?
(ग) कृषिक्षेत्रे सर्वं कार्यं कैः भवति ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) "मित्रवत्" इत्यस्य शब्दस्य विलोमपदं किम् ?
(क) शत्रुवत् (ख) मूर्खवत्
(ग) प्रवीणवत् (घ) पण्डितवत्

(ii) "सर्वेषु" इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) तृतीया (घ) सप्तमी

(iii) "नूतनाः चमत्काराः" अत्र विशेषणपदं किम्?
(क) नूतनाः (ख) चमत्काराः
(ग) नूतनाः चमत्काराः (घ) सर्वाः

(iv) "मनुष्यस्य" इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) सप्तमी (घ) षष्ठी

## खण्डः‘ख’

## रचनात्मक-कार्यम्

2. रूप्यकाणि प्रेषणार्थं पुत्रस्य पितरं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयत- 5

विवेकानन्द-छात्रावासः

इन्द्रप्रस्थ विश्वविद्यालयः

इन्द्रप्रस्थतः

दिनाङ्कः ..........

समादरणीयाः पितृचरणाः।

सादरं चरणवन्दनम्।

मम प्रथमसत्रस्य (i) ................. सम्प्रति सम्पन्ना। मम सर्वाणि प्रश्नपत्राणि शोभनानि अभवन्। अस्मिन् (ii) ................. अहं गृहं न आगमिष्यामि। इदानीं द्वितीयसत्रस्य (iii) ................. क्रेतव्यानि सन्ति । अतः भवद्भिः (iv) .................. पञ्चशतं रूप्यकाणि प्रेषणीयानि। अन्यत् (v) ................ कुशलम्। परिवारे सर्वेभ्यः ज्येष्ठेभ्यः नमः कनिष्ठेभ्यश्च स्वस्ति ।

भवदीयः प्रियपुत्रः

देवदत्तः

**मञ्जूषा**

| |
|---|
| यथाशीघ्रम् , पुस्तकानि , शीतावकाशे , परीक्षा , सर्वम् |

## (छन्द-अलङ्कार-परिचयः)

3.अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया पूर्णवाक्येन लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) वंशस्थछन्दसि कति वर्णाः भवन्ति?
(ख) इन्द्रवज्राछन्दसः उदाहरणं किम्?
(ग) मन्दाक्रान्ताछन्दसि कति वर्णाः भवन्ति?
(घ) नगणस्य कानि चिह्नानि सन्ति?

4.अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) यमकस्य अलङ्कारस्य उदाहरणं किम्?
(ख) श्लेषस्य अलङ्कारस्य लक्षणं किम् ?
(ग) अर्थान्तरन्यासस्य अलङ्कारस्य लक्षणं किम् ?
(घ) भवेत् --------------- प्रकृतस्य परेण यत्। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः'ग'

# पठित-अवबोधनम्

5.अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थंलिखत - 4×1=4

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।

दूरङ्गमञ्ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ।।

**अथवा**

तवैव खल्वेष महानुभाव ! मत्स्येन्द्र ! सत्त्वातिशयप्रभावः ।

आवर्जिता यत्कलशा इवेमे क्षरन्ति रम्यस्तनिताः पयोदाः ।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

बोधिसत्त्वः किल कस्मिंश्चित् नातिमहति कमलकुवलयादि-विभूषितसलिले हंसचक्रवाकादिशोभिते तीरान्ततरुकुसुमावकीर्णे सरसि मत्स्याधिपतिः बभूव। बहुषु जन्मान्तरेषु परोपकाराभ्यासवशात् तत्रस्थः अपि परहितसुखसाधने व्यापृतः अभवत्।

**अथवा**

हा धिक् हा धिक्! अयमपि नाम परसम्पत्त्या सन्तप्यते ? भगवन् कृतान्त ! पुष्करपत्रपतित-जलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः। (इति सास्रा)। जात! मा रुदिहि ! सौवर्णशकटिकया क्रीडिष्यसि ।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) भवान् न जानाति राजपथवृत्तम्।

(ख) भो जागृतास्मि क्व धनुः क्व खड्गः।

(ग) न केवलं रूपं शीलमपि तर्कयामि।

(घ) जीवेम शरदः शतम्।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः।

अमित्रान्नन्दयन्सर्वान्निर्मानो बन्धुशोकदः।।

**अन्वयः :-**

हे 1) ................. ! उत्तिष्ठ, सर्वान् 2) ...................... नन्दयन् 3) ......................... बन्धुशोकदः एवं 4) .................... मा शेष्व ।

**मञ्जूषा**

| पराजितः, निर्मानः, कापुरुष, अमित्रान् |
|---|

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-
(केवलं प्रश्नत्रयम्) 3×1=3

संस्कृतोद्यानदूर्वा दरिद्रीकृता
निष्कुटेषु स्वयं कण्टकिन्याहिता ।
पुष्पितानां लतानां न रक्षा कृता
विस्तृता वाटिकायोजना निर्मिता ।।

**प्रश्नाः -**

(क) अत्र का दरिद्रीकृता ?
(ख) निष्कुटेषु का आहिता ?
(ग) कीदृशीनां लतानां न रक्षा कृता ?
(घ) कीदृशी वाटिकायोजना निर्मिता ?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-
(केवलं प्रश्नत्रयम्) 3×1=3

अस्ति कालिन्दीतीरे योगिनीपुरं नाम नगरम्। तत्र अलावदीनो नाम यवनराजो बभूव। स चैकदा केनापि निमित्तेन महिमासाहिनाम्ने अकुप्यत्।

**प्रश्नाः -**

(क) कालिन्दीतीरे किम् नाम नगरम् ?
(ख) अलावदीनो नाम कः बभूव ?
(ग) अलावदीनो नाम यवनराजः कस्मै अकुप्यत् ?
(घ) चैकदा अत्र कः सन्धिः ?

10. कोष्ठकात् उपयुक्तशब्दं चित्वा रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत- (केवलं चत्वारः प्रश्नाः) 4×1=4

(क) सोमधरस्त्वामानीतवान् रिक्शायानेन । (कः /कैः)

(ख) यवनराजेन हम्मीरदेवं प्रति दूतः प्रहितः । (के /कं)

(ग) एषा इदानीं ते जननी संवृत्ता । (का / कः)

(घ) मीनाः जलाभावात् मृतप्रायाः इव सञ्जाताः । (कीदृशं / कस्मात्)

(ङ) आकाशे अकालाः अपि मेघाः प्रादुरभवन्। (के /कैः)

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) प्राचीनतमः वेदः कः ?

(ख) आर्यशूरस्य रचना का ?

(ग) महाभारतस्य कस्मिन् पर्वणि गीता अस्ति ?

(घ) श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य नाम किम् ?

(ङ) रामायणे दशरथस्य कति पुत्राः सन्ति ?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति ?

(ख) "ऋतुचित्रणम्" इति पाठः कस्मात् ग्रन्थाद् उद्धृतः ?

(ग) रामायणस्य लेखकः कः ?

(घ) शूद्रकस्य रचनायाः नाम किम् ?

(ङ) रामायणे कति श्लोकाः सन्ति ?

# खण्डः– 'घ'

# अनुप्रयुक्त-व्याकरणम्

13. (क) गुणसन्धेः अथवा अयादिसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) तत्पुरुषसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) सम्प्रदानकारकस्य अथवा सम्बन्धकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

# खण्डः – 'ङ'

# पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

1) "इत्येषः" इत्यस्य पदस्य सन्धि विच्छेदोऽस्ति -

(क) इति + एषः (ख) इ + एषः

(ग) इता + एषः (घ) इत + एषः

2) "द्वौ+अपि " इत्यत्र कः सन्धिः ?

(क) द्वौपि | (ख) द्वावपि

(ग) गुणसन्धिः | (घ) द्वापि

3) " रामोऽपि" इत्यत्र कः सन्धिविच्छेदोऽस्ति ?

(क) रामो + अपि | (ख) रामो + ऽपि

(ग) रामः + अपि | (घ) रामः + ऽपि

4) "यथापूर्वम् " इत्यत्र कः समासः ?

(क) अव्ययीभावसमासः | (ख) तत्पुरुषसमासः

(ग) कर्मधारयसमासः | (घ) द्वन्द्वसमासः

5) "भारतमाता" इत्यत्र समासविग्रहोऽस्ति -

(क) भारतं च माता च | (ख) भारतानां माता

(ग) भारतनां च माताः | (घ) भारताः माताः

6) "अलीकम्" इत्यस्य पदस्य पर्यायपदं किम् ?

(क) सत्यम् | (ख) असत्यम्

(ग) लीकम् | (घ) अनित्यम्

7) "मीनः" इत्यस्य पदस्य पर्यायपदं किम् ?

(क) मत्स्यः | (ख) खगः

(ग) विहगः | (घ) अण्डजः

8) "सत्या" इत्यस्य पदस्य विलोमपदं किम् ?

(क) अन्या | (ख) असत्या

(ग) अपरा | (घ) अधिका

9) "निष्क्रान्ता" इत्यस्य पदस्य विलोमपदं किम् ?

(क) कृत्वा | (ख) प्रविष्टा

(ग) कान्ता | (घ) हत्वा

10) "हसितम्" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) तुमुन् | (ख) क्त

(ग) शतृ | (घ) क्त्वा

11) "पठित्वा" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) क्त्वा (ख) शतृ

(ग) ल्यप् (ग) तुमुन्

12) "सह" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) चतुर्थी (ख) षष्ठी

(ग) सप्तमी (घ) तृतीया

13) "धिक्" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) तृतीया (ख) षष्ठी

(ग) द्वितीया (घ) पञ्चमी

14) "सनातनानि कुलानि" अत्र विशेष्यपदं किम् ?

(क) कुलानि (ख) सनातनानि

(ग) कुलातनानि (घ) सनाकुलानि

15) "अस्मद्" शब्दस्य सप्तम्यैकवचने किं रूपं भवति ?

(क) वयम् (ख) आवाम्

(ग) मयि (घ) अहम्

16) "देवेन" अत्र का विभक्तिः ?

(क) तृतीया (ख) षष्ठी

(ग) द्वितीया (घ) पञ्चमी

17) 'ज्ञात्वा' इति पदे कः प्रत्ययः ?

(क) क्त्वा (ख) ल्यप्

(ग) शतृ (घ) शानच्

# अङ्कयोजना उत्तरसङ्केताश्च

## कक्षा – एकादशी

## संस्कृत (2024-25)

**समयः - होरात्रयम्** **सम्पूर्णाङ्काः - 80**

**अवधातव्यम् –**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निर्देशात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्तव्यः। यथा पठितगद्यांशे त्रयाणां प्रश्नानाम् उत्तरलेखनम् अभीष्टं परं छात्रः यदि चतुर्णाम् प्रश्नानाम् उत्तराणि लिखति तर्हि तत्र केवलं प्रथमत्रयाणां प्रश्नानां न अपितु यानि उत्तराणि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः ।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।

| | **खण्डः 'क' अपठितावबोधनम्** | **10 अङ्काः** |
|---|---|---|
| **1.** | **अपठितगद्यांशाधारित-उत्तराणि :-** | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) विज्ञानप्रयाणमस्ति<br>(ख) जीवनयापनं दुष्करम् अस्ति<br>(ग) मानवसभ्यतायाः विकास अभवत् | 2×1=2 |
| | **(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>क) विज्ञानमाश्रित्य जनः अद्य आकाशे पक्षीवत् उत्पतति, भूमौ वायुवद् धावति, जले मत्स्य इव तरति।<br>ख) जीवनस्य प्रत्येकक्षेत्रे विज्ञानस्य महद् योगदानम् अस्ति।<br>(ग) कृषिक्षेत्रे सर्वं कार्यं विद्युच्चालितयन्त्रैः भवति। | 2×2=4 |
| | **(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**<br>'वैज्ञानिकयुगम्'<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः। | 1 |

| | | |
|---|---|---|
| | **(द) यथानिर्देशम् उत्तरत - ( केवलं प्रश्नत्रयम् )**<br>**उत्तराणि :-**<br>i. (क) शत्रुवत्<br>ii. (घ) सप्तमी<br>iii. (क) नूतनाः<br>iv. (घ) षष्ठी | 3×1=3 |
| **खण्डः 'ख' रचनात्मक-कार्यम्** | | **17 अङ्काः** |
| **2.** | **पत्राधारित-रिक्तस्थानपूर्तिः :-**<br><br>विवेकानन्द-छात्रावासः<br>इन्द्रप्रस्थ विश्वविद्यालयः<br>इन्द्रप्रस्थतः<br>दिनाङ्कः ..........<br>समादरणीयाः पितृचरणाः।<br>सादरं चरणवन्दनम्।<br>मम प्रथमसत्रस्य (i) **परीक्षा** सम्प्रति सम्पन्ना। मम सर्वाणि प्रश्नपत्राणि शोभनानि अभवन्। अस्मिन् (ii) **शीतावकाशे** अहं गृहं न आगमिष्यामि। इदानीं द्वितीयसत्रस्य (iii) **पुस्तकानि** क्रेतव्यानि सन्ति । अतः भवद्भिः (iv) **यथाशीघ्रं** पञ्चशतं रूप्यकाणि प्रेषणीयानि। अन्यत् (v) **सर्वं** कुशलम्। परिवारे सर्वेभ्यः ज्येष्ठेभ्यः नमः<br>कनिष्ठेभ्यश्च स्वस्ति ।<br>भवदीयः प्रियपुत्रः<br>देवदत्तः<br><br>**(छन्द-अलङ्कार-परिचयः)** | 5×1=5 |
| **3.** | **छन्दस्सु आधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नत्रयम्)**<br><br>(क) अनुष्टुप्-छन्दसि द्वात्रिंशत् वर्णाः भवन्ति।<br>(ख) उपेन्द्रवज्राछन्दसः कस्यापि उदाहरणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ।<br>(ग) मन्दाक्रान्ताछन्दसि सप्तदश वर्णाः भवन्ति ।<br>(घ) नगणस्य त्रीणि लघूनि चिह्नानि सन्ति । | 3×2=6 |
| **4.** | **अलंकारेषु आधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नत्रयम्)**<br>(क) यमकस्य अलङ्कारस्य कस्यापि उदाहरणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ।<br>(ख) श्लेषस्य अलङ्कारस्य लक्षणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ।<br>(ग) अर्थान्तरन्यासस्य अलङ्कारस्य लक्षणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ।<br>(घ) भवेत् **सम्भावनमथोत्प्रेक्षा** प्रकृतस्य परेण यत्। (लक्षणस्य रिक्तस्थानपूर्तिः ) | 3×2=6 |

| खण्डः 'ग' पठित-अवबोधनम् | | 30 अङ्काः |
|---|---|---|
| 5. | **पद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –**<br>प्रस्तुतपद्यांशः पाठ-1 **"वेदाऽमृतम्"** इति पाठाद् उद्धृतः।<br>**अथवा**<br>प्रस्तुतपद्यांशः पाठ-2 **"परोपकाराय सतां विभूतयः"** इति पाठाद् उद्धृतः।<br><br>कस्यापि एकस्य पद्यांशस्य हिन्दीभाषया प्रसङ्गं सरलार्थं च लेखनेन 1+3=4 अङ्काः प्रदेयाः। | 1×4=4 |
| 6. | **गद्याशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –**<br>प्रस्तुतगद्यांशः पाठ-2 **"परोपकाराय सतां विभूतयः"** इति पाठाद् उद्धृतः।<br>**अथवा**<br>प्रस्तुतगद्यांशः पाठ-4 **"सौवर्णशकटिका"** इति पाठाद् उद्धृतः।<br><br>कस्यापि एकस्य गद्यांशस्य हिन्दीभाषया प्रसङ्गं सरलार्थं च लेखनेन 1+3=4 अङ्काः प्रदेयाः। | 1×4=4 |
| 7. | **सूक्त्योः भावार्थलेखनम् :-**<br><br>प्रदत्तसूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेखनेन पूर्णाः अङ्काः 2+2=4 प्रदेयाः।<br><br>**अथवा**<br><br>**अन्वयस्य रिक्तस्थानपूर्तिः :- (उत्तराणि)**<br>1) कापुरुष<br>2) अमित्रान्<br>3) निर्मानः<br>4) पराजितः | 2+2=4<br><br>**अथवा**<br><br>4×1=4 |
| 8. | **पठितपद्यांशाधारित-उत्तराणि :-** **(केवलं प्रश्नत्रयम्)**<br>(क) संस्कृतोद्यानदूर्वा दरिद्रीकृता ।<br>(ख) निष्कुटेषु स्वयं कण्टकिन्याहिता।<br>(ग) पुष्पितानां लतानां न रक्षा कृता<br>(घ) विस्तृता वाटिकायोजना निर्मिता । | 3×1=3 |
| 9. | **पठितगद्यांशाधारित-उत्तराणि :-** **(केवलं प्रश्नत्रयम्)**<br>(क) कालिन्दीतीरे योगिनीपुरं नाम नगरम्।<br>(ख) अलावदीनो नाम यवनराजो बभूव।<br>(ग) अलावदीनो नाम महिमासाहिनाम्ने अकुप्यत्।<br>(घ) चैकदा अत्र वृद्धिसन्धिः। | 3×1=3 |

| | | |
|---|---|---|
| **10.** | **रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br><br>(क) कः<br>(ख) कम्<br>(ग) का<br>(घ) कस्मात्<br>(ङ) के | 4×1=4 |
| | **(संस्कृत-साहित्य-परिचयः)** | |
| **11.** | **संस्कृतसाहित्याधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नचतुष्टयम्)**<br><br>(क) ऋग्वेदः<br>(ख) जातकमाला<br>(ग) भीष्मपर्वणि<br>(घ) सांख्ययोग<br>(ङ) चत्वारः | 4×1=4 |
| **12.** | **संस्कृतसाहित्याधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नचतुष्टयम्)**<br><br>(क) अष्टादश (18)<br>(ख) रामायणात् ग्रन्थात्<br>(ग) महर्षिः वाल्मीकिः<br>(घ) मृच्छकटिकम्<br>(ङ) चतुर्विंशतिः सहस्राणि | 4×1=4 |
| | **खण्डः 'घ' अनुप्रयुक्त-व्याकरणम्** | **06 अङ्काः** |
| **13.** | (क) गुणसन्धेः अथवा अयादिसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ ।<br>(ख) तत्पुरुषसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ ।<br>(ग) सम्प्रदानकारकस्य अथवा सम्बन्धकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ । | 1×2=2<br>1×2=2<br>1×2=2 |

| | खण्डः – 'ङ' पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | 17 अङ्काः |
|---|---|---|
| 14. | **प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत –**<br>**उत्तराणि :-**<br>1) (क) इति+एषः<br>2) (ख) द्वावपि<br>3) (ग) रामः + अपि<br>4) (क) अव्ययीभावसमासः<br>5) (ख) भारतानां माता<br>6) (क) सत्यम्<br>7) (क) मत्स्यः<br>8) (ख) असत्या<br>9) (ख) प्रविष्टा<br>10) (ख) क्त<br>11) (क) क्त्वा<br>12) (घ) तृतीया<br>13) (ग) द्वितीया<br>14) (क) कुलानि<br>15) (ग) मयि<br>16) (क) तृतीया<br>17) (क) क्त्वा | 17×1=17 |